# ॥ जल्पमञ्जरी ॥

प्राच्यमुनिपुङ्गवविरचिता (?)

संशोधिताच—श्रीमद्वल्लभ विजयमुनि वर्यां ते वासिना मुनि ललितविजय.

न्यायाम्भोनिधि–श्रीमद्विजयानन्दसूरीश्वर शिष्य–श्रीमत्प्रमोदविजय शिष्य–श्रीमदमृतविजय शिष्य–श्रीकीर्तिवि
मुनिवर्योपदिष्ट–वडनगर–वास्तव्य–प्राग्वाट (पोरवाल) ज्ञातीय–शा. उमेदरामपत्नी–जेठीबाई–स्मर
णार्थं तत्पुत्रत्रिभुवनप्रदत्तद्रव्य साहाय्येन प्रकाशयित्री भावनगरस्था श्रीजैन "आत्मानन्द सभा"

वीरनिर्वाणात् २४४४. आत्मसंवत् २३. विक्रमसंवत् १९७४. ईस्वीसन् १९१८.

Printed by Gulabchand Lalubhai at the Anand Printing Press BHAVNGAR.

# ॥ निवेदन ॥

महाशय वाचकवृन्द ! आज आपके करकमलोंमें अपूर्वग्रन्थरूप उपहार समर्पण किया जाता है। आशा है कि आप सज्जन इस यत्न संपादित ग्रन्थरत्नको सहर्ष स्वीकारकर ग्रन्थकर्त्ताके अनल्प प्रयासको सफलता देंगे।

इस जल्पमंजरी नामक ग्रन्थको किस विद्वानने किस समयमें निर्म्माण किया है, इस विषयका कोई निश्चित साधन न मिलनेसें इसबातका कुछभी उल्लेख नहीं करशकताहूं। यह संशोधक आप सज्जनोंसेंही निवेदन करता है कि प्रस्तुत ग्रन्थ यत्कर्त्तृ-कहो उसकी सूचना देकर उपकृत करें। ग्रन्थ संशोधनके समय सिर्फ एकही पुस्तक मुनिमहाराजश्री मानविजयजीद्वारा प्राप्त हुआहै। अतः एकही प्रतिके आधारसें प्रस्तुत ग्रन्थ संशोधन किया गया है। जिससें किंसीभी स्थानपर जो कोईभी स्खलना हुईहो या लेखक शोधक अक्षरयोजकका प्रमाद हुआहो तो उसे सुधारकर वांचनेकी प्रार्थना है। यह पुस्तक सद्गत निजजननी श्रीमति जेठीबाईके स्मरणार्थ श्रीमद्विजयानन्दसूरि ( आत्मारामजी ) महाराजके प्रशिष्य मुनिमहाराजश्री अमृतविजयजीके शिष्य मुनिमहा-राजश्री किर्तिविजयजीने उपदेशद्वारा वडनगर निवासी निजभ्राता त्रिभुवनदास उमेदरामसें प्रकाशित करवाया हैं।

संवत-१९७४-आषाढ कृष्ण अष्टमी—राजनगर.

निवेदक—मुनिश्री वल्लभविजयजी चरणचंचरिक मुनि ललितविजय।

# ॥ श्रीजल्पमञ्जरी ॥

वसुधानन्दनरूपं, वसुधानन्दननखत्विषं नत्वा । वसुधानन्दनगणभृन्नतक्रमं वर्द्धमानजिनम् ॥ १ ॥
सुधानन्दनसूरीन्द्र–पादपद्मप्रसादतः । मुग्धबोधाय मुग्धोऽपि, कुर्वेऽहं जल्पमञ्जरीम् ॥२॥ युग्मम् ।

सकलप्रामाणिकप्राणिप्रतीतस्फीतमहीरुहजातिख्यातिमद्धरिचन्दनायमानाः, सरससुकोमलसुशीतलताद्यनणुगुणग्रामरामणीयकरमाधामसर्वजनाप्यायकसुवचनरचनाहरिचन्दनायमानाः,! मानातीतगुणग्रामाः! समागम्यतां, आगम्य तामरसामिवामरसमानरूपाः सहस्रपादैरिव स्वपादैरिदमासनमलङ्क्रियतां, क्रियतामनुग्रहः स्वविग्रहेण । अद्यास्माकं निरर्गलानि भाग्यानि जागरितानि तानि, यतो युष्मादृशा मादृशानां सदनं सदनङ्गरूपा अकूपारा इव गुणगणानां प्रापुः । यत उक्तं,

"साधूनां दर्शनं श्रेष्ठं तीर्थभूता हि साधवः । तीर्थं फलति कालेन सद्यः साधुसमागमः ॥ १ ॥"

यतः उत्तमानां के के गुणा वर्ण्यन्ते ?–

" चेतः सार्द्रतरं वचः सुमधुरं दृष्टिः प्रसन्नोज्ज्वला
शक्तिः क्षान्तियुता मतिः श्रितनया श्रीर्दीनदैन्यापहा ।
रूपं शीलयुतं श्रुतं गतमदं स्वामित्वमुत्सेकता–
निर्मुक्तं प्रकटान्यहो नव सुधाकुण्डान्यमून्युत्तमे ॥ २ ॥ "

अपि च कुतः समागताः ? समागता । बहवो दृष्टानां शुभवतां भवतां । किमत्र प्रयोजनं ? योजनं विधाय करकमलयोरमलयोः परिपृच्छ्यमानमस्ति । अस्ति स्वस्ति भवतां ? कस्मिन् देशे कस्मिंश्च सन्निवेशे युष्माकमायुष्मतां वास आसीत् ? किंनामा ग्रामः काम्यते स्ववासवेश्मतया ? त्वया कानि कानि शास्त्राण्यधीतानि वर्त्तन्ते ? केषु केषु शास्त्रेषु अत्यन्तं परिचय उपचीयते भवतां ? किमसङ्ख्यसङ्ख्यावल्लक्षपक्षविहितबहुलक्षणे लक्षणे ? किंवा पीयूषमाधुर्यधुर्यसौकुमार्यप्रत्यक्षलक्षणप्ररव्यहारहूराहङ्कारहुङ्कारवारिहारिव्याहारपरम्परापरार्थसार्थसन्दर्भगर्भनानाग्रन्थप्रथनप्रत्यग्रनव्यश्रव्यकाव्यरसप्रसरास्वादनसञ्जायमान सकलकविकुलाविकलनिरत्ययसौहित्येसाहित्ये ? किं वा वादिपराजयभीतकविजनरक्षादक्षशास्त्रे छन्दःशास्त्रे ? किं वा कविवृषभकशास्त्रे ज्योतिष्कशास्त्रे ? किमथवा जाड्यताड्यार्खदोर्दण्डाडम्बराविडंबकानेकच्छेकाविवेककरपरसहस्रहेतुकरनिकरपरिकरानुकृतसदर्के शुभोदर्के तर्के ? व्याकरणे चेत्–व्याकरणानि बहूनि सन्ति । तन्नामानि यथा–ऐन्द्र–जैनेन्द्र–सिद्धहेमचन्द्र–पाणिनीय–सारस्वत–शाकटायन–वार्मन–विश्रान्त–विद्याधर–सरस्वतीकण्ठाभरण–बुद्धिसागर–मुष्टिव्याकरण–कालापक–भीमसेन–शैव–गौड-

नयोत्पल इत्यष्टादश व्याकरणानि, एतेषां मध्ये किंनाम व्याकरणमधीतमस्ति ? भवतु वा यत्तत् साध्यन्तां तद्गतप्रयोगाः—अतिजरः, अतिजरसं, अतिजरं कुलं, भवांश्छूरः, भवाञ्चूशूरः, भवाञ्शूरः, भवाञ्छूरः, एते चतुष्कप्रयोगाः । आख्यातप्रयोगाश्च—असंत्, असोत्, असौनिष्ट, मारिरेकैमा, मामीमिळिरे, (रे) असीदाम, अजघ्नोः, अर्पास्याः इत्यादिक्रियाप्रयोगाः । साहित्ये चेत्, केके साहित्यग्रन्था मन्थानकल्पानल्पस्वबुद्ध्या दधिवदवगाहिताः ? तन्नामानि यथा—सदोश्रयद्वाश्रय—शक्यकाविरहस्य—विदग्धमुखमण्डन—पद्मानन्दकाव्य—महानन्दकाव्य—रघु—माघ—नैषध—कुमारसंभव—कविशिक्षा—मेघदूत—नेमिदूत—चेतोदूत—मुरारिनाटक—मुद्रितकुमुदचन्द्रनाटक—रङ्गमङ्गलनाटक—दूताङ्गदनाटक—धर्मशर्मरतिनाटक—मोहपराजयनाटक—करुणावज्रायुधनाटक—जिनशतक—विहारशतक—सूर्यशतक—सोमशतक—अमरुशतक—सुकृतसङ्कीर्त्तन—रामरमणकेलि—खण्डप्रशस्ति—कीर्त्तिकौमुदी प्रमुखग्रन्था निजनिर्मलप्रज्ञापरिज्ञानमुकुरान्तः सङ्क्रामिताः श्रीमद्भिर्विद्वच्चक्रशक्रैः ? । छन्दः शास्त्रे चेदतीव परिचयस्तर्हि श्रूयन्तां तद्ग्रन्थनामानि,—छन्दोऽनुशासन—वृत्तरत्नाकर—अलङ्कारचूडामणि—वाग्भट्टालङ्कार—काव्यप्रकाश—तत्सङ्केत—कविशिक्षापारिमलादयोऽन्येऽपि बहवः । ज्योतिः शास्त्रे चेत् रत्नमाला—मुहूर्त्तसार—वाराहीसंहिता—नारचन्द्र—नरपतिजयचर्या—त्रैलोक्यप्रकाश—भुवनदीपक—खण्डखाद्य—करणकुतूहलादयो भूयांसोऽपि ज्योतिर्ग्रन्थाः । तर्के चेत् युष्माकमायुष्मतां शेमुषी विशेषसंमुखीनसमासेदुषी तदा षण्णां दर्शनानां स्वरूपं निरूप्यतां । तद्यथा—

" बौद्धं[१] नैयायिकं[२] साङ्ख्यं[३] जैनं[४] वैशेषिकं[५] तथा । जैमिनीयं[६] च नामानि दर्शनानाममून्यहो ॥१॥ "

नोट—नछौजचशौ जशाविति चतुष्टयंरुपाणामिः तुक छत्वं चतोयानां विकल्पनात् ॥

तत्र तावद् बौद्धमते, बुद्धो देवता, द्वे प्रमाणे, प्रत्यक्षं अनुमानं च । तत्रायं घटः अयं पट इत्यादिकल्पनानामसञ्चाररहितं इन्द्रियपदार्थसंयोगोत्पन्नं निश्चयरूपं अभ्रान्तं प्रत्यक्षं पक्षधर्मत्वं स्वाश्रयमध्यवर्त्तमानत्वं १ सपक्षसत्वं स्वाश्रयसमानधर्मे पदार्थेऽपि वर्त्तमानत्वं २ ।विपक्षासत्व स्वाश्रयविपरीतवस्तुमध्याऽवर्त्तमानत्वं ३ इति रूपत्रययुक्ताल्लिङ्गाल्लिङ्गिनः पदार्थस्य ज्ञानमनुमानं २ यथा पर्वतोऽयं वह्निमान् धूमवत्त्वात् । अत्र पर्वतः पक्षः धूमवत्त्वं हेतुः, स च पक्षे स्वाश्रये पर्वते वर्त्तते इति पक्षधर्मत्वं १ सपक्षे महानसादौ वर्त्तत इति सपक्षसत्त्वं २ विपक्षे जलाशयादौ नास्तीति विपक्षासत्वं ३ इति हेतोस्त्रीणि रूपाणि इत्यनुमानं २ सर्ववस्तु अनित्यं क्षणक्षयि स्थूलपदार्थनिराकरणं, केवलाः परमाणव एव तत्त्वं इति बौद्धमतसङ्क्षेपः ॥ १ ॥

नैयायिकमते ईश्वरो देवता सर्वव्यापी सर्वज्ञो जगत्कर्त्ता नित्यश्च । प्रमाण–प्रमेय–संशय–प्रयोजन–दृष्टान्त–सिद्धान्त–अवयव–तर्क–निर्णय–वाद–जल्प–वितण्डा–हेत्वाभास–छल–जाति–निग्रहस्थानानि, इति षोडश तत्वानि । तत्रार्थोपलब्धिहेतुः प्रमाणं, अर्थस्य-पदार्थस्य योपलब्धिर्ज्ञानं तस्य यन्मुख्यं कारणं तत्प्रमाणं । तच्चतुः प्रकारं, प्रत्यक्षं १ अनुमानं २ उपमानं ३ आगमः ४ । तत्रेन्द्रियपदार्थसंयोगोत्पन्नं व्यवसायरूपं अव्यभिचारि ज्ञानं प्रत्यक्षं । अनुमानं प्रागुक्तस्वरूपं । उपमानं प्रतीतमेव । आगमः सिद्धान्तः । १ । प्रमेयं प्रमाणग्राह्यपदार्थो घटपटादिः । २ । संशय–प्रयोजन–दृष्टान्त–सिद्धान्ताः प्रतीताः । अवयवाः पञ्चानुमानप्रमाणस्य । ते च यथा–प्रतिज्ञा–हेतु–दृष्टान्त–उपनय–निगमाः । साध्यधर्मविशिष्टो धर्मी पक्षः, साध्यविशिष्टः साध्ययुक्तः पक्षः प्रतिज्ञा, यथा पर्वतोऽयं वह्निमान् नास्ति सर्वज्ञः शीतो वह्निः इत्यादि प्रतिज्ञा १ धूमवत्त्वादिति हेतुः २ यो यो धूमवान् स स वह्निमानिति व्याप्तिः, यथा महानसं इति दृष्टान्तः ३ धूमवांश्चायं इति उपनयः ४ हेतोः साध्यविशिष्टे धर्मिणि पक्षे

प्रथमान्तविशेषणतयोपनयनमुपनयः, हेतोरुपसंहारवचनमुपनयः, इति वचनात् तस्माद्वह्निमानिति निगमः ५ हेतोः कारणात् साध्यधर्मस्य पक्षे नितरां गमनं पुनः प्रथमान्ततया कथनं निगमः, हेतूपदेशेन साध्यधर्मोपसंहरणं निगमनमिति वचनात् इति पञ्च अवयवाः अनुमानस्य । तर्को विचारः ८ निर्णयो निश्चयः ९ वादः आचार्यशिष्ययोः पक्षप्रतिपक्षपरिग्रहात् या कथाभ्यासहेतुर्वादः १० विजिगीषोर्जेतुकामस्य पुरुषस्यसंकथा जल्पः ११ युक्तिरहितो जल्पो वितण्डा १२ हेत्वाभासाः हेतुवदाभासमाना मिथ्याहेतव इत्यर्थः । ते च पञ्च असिद्ध–विरुद्ध–नैकान्तिक–कालात्ययापादिष्ट–प्रकरणसमाख्याः । तत्र यो हेतुः पक्षे स्वाश्रये न वर्त्तते सोऽसिद्धः, यथा अनित्यः शब्दः चक्षुर्ग्राह्यत्वात् अत्र चक्षुर्ग्राह्यत्वं हेतुः शब्दे पक्षे न विद्यते इत्यसिद्धः १ यो हेतुः पक्षे स्वाश्रये सपक्षे स्वाश्रयसमानपदार्थे न वर्त्तते, विपक्षे स्वाश्रयविपरीते पदार्थे वर्त्तते स विरुद्धः, यथा अश्वोऽयं विषाणित्वात् यथात्र विषाणित्वं हेतुः स्वाश्रये पक्षेऽश्वे न वर्त्तते सपक्षेऽश्वसमानेऽन्यस्मिन्नश्वे न वर्त्तते किन्तु तद्विपरीते विपक्षे गवादौ वर्त्तते अतोऽयं हेतुर्विरुद्धः, पक्षसपक्षावृत्तिः केवलविपक्षवृत्तिर्विरुद्ध इति वचनात् ।

अत्र नोदकः प्राह– अयं हेतुः पक्षे स्वाश्रये न वर्त्तते अतोऽसिद्धः कस्मान्न भवति ?

उच्यते–यो हेतुः सपक्षे विपक्षे वर्त्तते पक्षे स्वाश्रये न वर्त्तते सोऽसिद्धः, यथा नित्यः शब्दः चक्षुर्ग्राह्यत्वात् इति चक्षुर्ग्राह्यत्वं शब्दस्य सपक्षेऽन्यानित्यपदार्थे घटादौ शब्दस्य विपक्षे नित्यपदार्थे आकाशादौ च वर्त्तते इति युक्त्या विषाणित्वादयं हेतुर्नासिद्धः किन्तु विरुद्ध एव २

यो हेतुः पक्षे सपक्षे विपक्षे च वर्त्ततेऽसावनैकान्तिकः, यथा नित्यः शब्दः प्रमेयत्वात्, अत्र प्रमेयत्वं हेतुः पक्षे शब्दे

सपक्षे अन्यनित्यपदार्थे विपक्षे चानित्ये घटपटादौ वर्त्तते अतोऽनैकान्तिकः पक्षत्रयवृत्तिरनैकान्तिक इति वचनात् ३ यत्र हेत्वा-वुपन्यस्ते साध्यधर्मप्रत्यक्षेणानुमानेन आगमेन बाधितो भवति स हेतुः कालात्ययापदिष्ट उच्यते । प्रत्यक्षबाधितो यथा शीतो वह्निर्दाहकत्वात्, अत्र बहवः प्रत्यक्षेण वह्नेरुष्णत्वमेव प्रतीयन्ति न शीतत्वमिति प्रत्यक्षबाधितः । अनुमानबाधितो यथा नास्ति सर्वज्ञः प्रमाणपञ्चकाग्राह्यत्वाम् इति अत्रैव प्रत्यनुमानं–अस्ति सर्वज्ञः अविसंवादिचन्द्रग्रहणादिज्योतिःशास्त्रनिर्माणानुपपत्तेरिति । आगमबाधितो यथा ब्राह्मणेन सुरा पेया द्रवत्वात् जलवदिति, आगमे ब्राह्मणानां सुरापानं निषिद्धं इति आगमबाधितः । ४ । यो हेतुः स्वपक्षस्य स्वाश्रयस्य साध्यधर्मविशिष्टस्य साधने परपक्षस्य विपक्षस्य दुष्टसाध्यरहितस्य साधनेऽपि तथैव त्रिरूपः प्रकरणसम उच्यते, प्रकरणपक्षे विपक्षे च तुल्य इत्यर्थः । यथा अनित्यः शब्दो नित्यधर्मानुपलब्धेः घटवदिति, नित्यः शब्दोऽनित्यधर्मानुपलब्धेः आकाशवदिति ।

अत्र नोदको वदति, प्रत्यनुमानसद्भावात् कालात्ययापदिष्टोऽयं हेतुरिति चेत्–कालात्ययापदिष्टे प्रत्यनुमानकरणे हेत्वन्तरं, अत्र तु प्रकरणसमे स एव हेतुः शब्दघटनया इति भेदः इति पञ्चहेत्वाभासाः । एतेषां भेदाः ग्रन्थविस्तरभयान्नदर्शिताः इति पञ्चहेत्वाभासस्वरूपम् १३

छलं त्रिधा वाक्छलं १ सामान्यच्छलं २ उपचारच्छलं ३ । वाक्छलं यथा–नव कम्बलाः संभवन्ति, दरिद्रस्यास्यैकस्यापि कम्बलस्यासंभवात् इति वाक्छलं १ सामान्यच्छलं यथा–ब्राह्मणे विद्याचरणसंपदिति वादिना प्रतिपादिते प्रतिवादी वक्ति, व्रात्ये संस्कारवर्जिते क्रियारहितेऽपि ब्राह्मणे सा भविष्यति, व्रात्योऽपि ब्राह्मण एवेति सामान्यच्छलं २ उपचारच्छलं यथा–

मश्चाः क्रोशन्ति, मश्चयुक्ताः पुरुषाः क्रोशं यावद्गच्छन्ति इति वादिनोक्ते प्रतिवादी प्राह, अचेतना मश्चाः कथं क्रोशं यावद्गच्छन्ति ? इत्युपचारच्छलं १४

जातयो दूषणाभासाः दूषणवदाभासमानाः मिथ्यादूषणानि, ताश्च चतुर्विंशतिर्[24]यथा—साधर्म्य[1]—वैधर्म्य[2]—उत्कर्ष[3]—अपकर्ष[4]—वर्ण्य[5]—अवर्ण्य[6]—विकल्प[7]—साध्य[8]—प्राप्ति[9]—अप्राप्ति[10]—प्रसङ्ग[11]—प्रतिदृष्टान्त[12]—अनुत्पत्ति[13]—संशय[14]—प्रकरण[15]—अहेतु[16]-अर्थापत्ति[17]-अविशेष[18]-उपपत्ति[19]—उपलब्धि[20]—अनुपलब्धि[21]—नित्य[22]—अनित्य[23]—कार्यसमाः[24]। तत्र साधर्म्येण समानधर्मेण पक्षसत्कगुणेनैव प्रत्यवस्थानं साधर्म्यसमाः जातिः, यथा अनित्यः शब्दः कृतकत्वात् घटवदिति, प्रयोगे नित्य (:) शब्दो निरवयत्वात् आकाशवदिति प्रत्यवस्थानं। अत्र कृतकत्वं निरवयवत्वं च द्वयमपि शब्दस्य गुणो धर्मः इति समानधर्मेण प्रत्यवस्थानं। वैधर्म्येण विरुद्धधर्मेण पक्षान्यविरिक्तेन प्रत्यवस्थानं वैधर्म्यसमा जातिः, यथा—अनित्यः शब्दः कृतकत्वात्, अस्मिन्नेव प्रयोगे प्रतिवादी वक्ति, नित्यः शब्दो निरवयत्वात्, अनित्यं हि सावयवत्वं दृष्टं यथा घटपटादि, अत्र सावयवत्वं शब्दस्य धर्मो न भवति इति विरुद्धधर्मेण प्रत्यवस्थानं वैधर्म्यसमा २ उत्कर्षसमा जातिः यथात्रैव प्रयोगे कृतकत्वात् घटवदनित्यः शब्दः तथा मूर्त्तोऽपि भवेत् घटवदिति, शब्दे मूर्त्तत्वधर्मोत्कर्षापानादुत्कर्षसमा जातिः ३ अपकर्षसमा जातिर्यथा कृतकत्वात् घटवदनित्यः शब्दस्तथा अश्रावणोऽपि अश्रवणग्राह्यो भवतु इति शब्दस्य श्रावणत्वमपकर्षयति ४ साध्यदृष्टान्तधर्मविपर्यस्यतः संशयं कुर्वतः प्रमातुः पुरुषस्य साध्यधर्मदृष्टान्तधर्माणां वैशिष्य-कथनात् वर्ण्यावर्ण्यसमे जाती। यतो यादृकृतकत्वधर्मो घटस्य न तादृक् शब्दस्य यादृक् शब्दस्य न तादृक् घटस्य, घटस्य हि कुंभकारादिजन्यकृतकत्वं इति वर्ण्य ५ अवर्ण्यसमे जाती ६ विकल्पेन प्रत्यवस्थानं विकल्पसमा जातिः, यथा तत्रैव प्रयोगे कृत-

कत्वात्, किञ्चित् कृतकं वस्तु मृदु किञ्चित्कर्कशं, तथा किञ्चिद्वस्तु नित्यं शब्दादिकं किञ्चिद् घटपटादिकमनित्यमित्यपि भविष्यति इति विकल्पसमा जातिः ७ साध्यसाम्यापादनेन साध्यसमा जातिः, यथा यादृशो घटस्तादृशः शब्दस्तर्हि शब्दसाध्यं तद्वद् घटोऽपि साध्यो भवेत् ८ प्राप्त्यप्राप्तिविकल्पाभ्यां प्रत्यवस्थानं प्राप्त्यप्राप्ती जाती । यथा कृतकत्वहेतुः साधनं साधनं प्राप्याप्राप्य वा साधयति, प्राप्य चेत् द्वयोः साध्यसाधनयोर्विद्यमानयोरेव प्राप्तिर्न सदसतोः, द्वयोश्च साध्यसाधनयोः सत्वे सव्येतरगोविषाणयोरिव न साध्यत्वं साधनत्वं च, अप्राप्येतु साधनत्वमयुक्तं अतिप्रसङ्गात् इति प्राप्त्यप्राप्तिसमे जाती ९--१० अतिप्रसङ्गापादनेन प्रसङ्गसमा जातिः, यथा यद्यनित्यत्वे कृतकत्वं तदा कृतकत्वे किं साधनं ? तत्रापि किमिति ११ प्रतिदृष्टान्ते तत्प्रतिकूलदृष्टान्तेन प्रत्यवस्थानं प्रतिदृष्टान्तसमा जातिः, यथा अनित्यः शब्दः प्रयत्नानन्तरीयकत्वात् घटवदिति उक्ते, जातिवादी वदति, यथा घटः प्रयत्नानन्तरीयकोऽनित्यो दृष्टः । एवं प्रतिदृष्टान्तरूपं आकाशं नित्यमपि प्रयत्नानन्तरीयकं दृष्टं कूपखननादिप्रयत्नानन्तरमुपलम्भात् १२ अनुत्पत्त्या प्रत्यवस्थानं अनुत्पत्तिसमा जातिः, यथानुत्पन्ने शब्दाख्ये धर्मिणि कृतकत्वं धर्मः क वर्त्तते ? इति १३ साधर्म्यसमा वैधर्म्यसमा च या जातिः, किं घटः साधर्म्यात् कृतकत्वादनित्य उत तद्वैधर्म्यात् आकाशसाधर्म्यान्निरवयवत्वान्नित्य इति ? १४ प्रकरणात्प्रत्यनुमानात् जाता प्रकरणसमा जातिः, यथा अनित्यः शब्दः कृतकत्वात्, अत्र प्रयोगे नित्यः शब्दः श्रावणत्वात् १५ हेतोस्त्रैकाल्यानुपपत्त्या हेतुसमा जातिः, यथा हेतुः साध्यात्पूर्वं पश्चात्सह वा भवेत् पूर्वं वद ? इति साध्ये तत्साधनं कस्य स्यात् ? पश्चाच्चेत् ब्रूहि, साध्यं पूर्वं सिद्धं किं साधनेन हेतुना ? युगपच्चेत् तदा सव्येतरगोविषाणयोरिव तयोः साध्यसाधनभावो न भवेत् १६ अर्थापत्त्याप्रत्यवस्थानं अर्थापत्तिसमा, यथा यद्यनित्यघटादिसाधर्म्यात् कृत-

 



कत्वात् अनित्यशब्दस्तर्हि अर्थादापद्यते निरवयत्वादाकाशसाधर्म्यान्नित्योऽपि १७ अविशेषेण प्रत्यवस्थानं अविशेषसमा जातिः, यथा यदि कृतकत्वैकगुणेन शब्दघटयोरेकत्वादनित्यत्वमिष्यते तदा सर्वेषां भावानामविशेषेणैकैकेन गुणेन सादृश्यं, एवंच प्रमेयत्वगुणेन घटाकाशयोः साम्यं, घटो नित्यः स्यादाकाशं वा अनित्यं स्यादिति १८ उपपत्त्या* प्रत्यवस्थानं उपपत्तिसमा जातिः, यथा यदि कृतकत्वस्योपपत्त्या शब्दस्यानित्यत्वं तथा (तदा) निरवयत्वोपपत्त्या नित्यत्वमपि १९ उपलब्ध्या प्रत्यवस्थानं उपलब्धिसमा जातिः, यथा अनित्यः शब्दः प्रयत्नानन्तरीयकत्वान्न खलु प्रयत्नानन्तरीयकत्वमनित्यत्वसाधनं येन विनासाध्यं नोपलभ्यते उपलभ्यते च प्रयत्नानन्तरीयकत्वं विनापि विद्युदादीनामनित्यत्वं २० अनुपलब्ध्या प्रत्यवस्थानं अनुपलब्धिसमा जातिः, यथाऽत्रैव प्रयत्नानन्तरीयकत्वहेतौ वक्ति न प्रयत्नकार्यशब्दः प्रागुच्चारणादस्त्येव विकरणयोगात्तु नोपलभ्यते २१ नित्यानित्यत्वविकल्पेन प्रत्यवस्थानं नित्यसमा जातिः, यथा अनित्यः शब्दः इति पक्षे प्रतिवादी वदति, येयमनित्यता शब्दस्योच्यते, सा नित्या अनित्या वा स्यात् ? अनित्या चेत्तदा तस्या अपगमे शब्दो नित्य एव, नित्या चेत्तदापि तद्धर्मित्वात्तदिव शब्दोऽपि नित्य एव २२ सर्वभावानामनित्यत्वोद्भावनेन+ प्रत्यवस्थानमनित्यसमा जातिः, यथा घटसाधर्म्याऽनित्यत्वेन यदि शब्दस्यानित्यत्वं तदा सर्वभावानामस्त्येव किमपि घटसाधर्म्यं प्रमेयत्वादिना इति सर्वेऽप्यनित्या एव, अथ ते नानित्यास्तदा शब्दोऽपि मा भवतु २३ प्रयत्नकार्येण तत्वोपन्यासेन प्रत्यवस्थानं कार्यसमा जातिः, यथा प्रयत्नस्य द्वैरूप्यं किञ्चिदसदेव जायते घटादिकं, किञ्चिदावरणव्युदासादिनाऽभिव्यंज्यते, ततः प्रयत्नेन शब्दो जन्यतेऽभिव्यज्यते वा इति संशयापादनेन कार्यसमा जातिः २४ इति जातयो दूषणाभासाः ॥ १५ ॥

* युक्त्या । + अनित्यत्वप्रकटीकरणेन ।

परोऽपि पक्षो येन निगृह्यते तन्निग्रहस्थानं । निग्रहस्थानभेदा २२ द्वाविंशतिर्यथा–प्रतिज्ञाहानिः, प्रतिज्ञान्तरं, प्रतिज्ञाविरोधः, प्रतिज्ञासन्न्यासः, हेत्वन्तरं, अर्थान्तरं, निरर्थकं, अविज्ञातार्थकं, अपार्थकं, अप्राप्तकालं, न्यूनं, अधिकं, पुनरुक्तं, अननुभाषणं, अज्ञानं, अप्रतिभासनं, विक्षेपः, मतानुज्ञा, पर्यनुयोज्योपेक्षणं, निरनुयोज्यानुयोगः, अपसिद्धान्तः, हेत्वाभासाश्च । एतद्व्याख्योदाहरणानि ग्रन्थान्तराद् ज्ञेयानि । इह सङ्क्षेपस्याधिकृतत्वात् । नैयायिकानां मते इन्द्रियपदार्थसंयोगः सन्निकर्षस्तस्य प्रामाण्यं इति नैयायिकमतसङ्क्षेपः ॥

साङ्ख्याः केचिदीश्वरं देवं मन्यन्ते तेषां सर्वेषां पञ्चविंशतिः २५ तत्वानि । तत्र सत्त्व–रज–स्तमोरूपगुणत्रयप्रसाद–ताप-दैन्यरूपकार्यलिङ्गस्य कार्यहेतोर्या समावस्था (सा) प्रकृतिः, तस्याश्चतुर्विंशतिर्भेदाः, अपरः पुरुषो जीव इति पञ्चविंशति २५ स्तत्वानि । तत्र शुभाशुभं पुण्यपापादिकं प्रकृतिः करोति, प्रकृतिर्बध्यते, प्रकृतिर्मुच्यते । प्रकृत्या सहात्मनो यदा वियोगः स्यात्तदा मोक्षो जीवस्य । साङ्ख्यानां जीवस्वरूपं,–“ अमूर्तश्चेतनो भोक्ता नित्यः सर्वगतोऽक्रियः । अकर्ता निर्गुणः सूक्ष्म आत्मा कापिलदर्शने ” ॥ १ ॥ सर्वं वस्तु नित्यं, प्रत्यक्षमनुमानमागम इति प्रमाणत्रयं । इति साङ्ख्यमतम् ।

जैनमते जिनो देवः । जीवं–अजीवं–पुण्यं–पापं–आश्रव–संवर–निर्जरा–बन्ध–मोक्षा इति नव तत्वानि । सम्यग् ज्ञान-दर्शनचारित्रयोगात् मोक्षो भव्यानां । द्वे प्रमाणे, प्रत्यक्षं परोक्षं, स्पष्टज्ञानं प्रत्यक्षं, तद् द्विविधं मुख्यं सांव्यवहारिकं च । तत्र कर्मक्षयात् ज्ञानमवधिमनः पर्यायकेवलज्ञानरूपं जीवमात्रसाक्षिकं ज्ञानं मुख्यं । ननु कथमिदं प्रत्यक्षं ? उच्यते, अक्षो जीवस्तं प्रतिगतं प्रत्यक्षमिति व्युत्पत्तिः । सांव्यवहारिकमिन्द्रियद्वारोत्पन्नं प्रत्यक्षं, अन्यत् सर्वं परोक्षं स्मरणप्रत्यभिज्ञानं, उपमानागमा-

गमार्थापत्तिभेदाः सर्वेऽपि परोक्षान्तर्गता एव जैनमते । नित्यानित्यभेदसत्वासत्वसामान्यविशेषादिनानासम्बन्धकधर्माधारं सर्ववस्तु अनेकान्तरूपं स्याद्वादरूपं । ननु समस्तवस्तुस्तोमप्ररूपणायामनेकान्तवादे मन्यमाने दुर्द्धरविरोधगन्धसिन्धुरो मदोद्धुरतयोत्कन्धरतां दधानः स्थानस्थानामानमानवमनःकम्पमापादयन् केन वारयितुं शक्यते ? यदि सर्वं वस्तु नित्यं तर्हि अनित्यं कथं ? अनित्यं चेत्तदा नित्यं कथं ? एवं भेदाभेदसत्वासत्वसामान्यविशेषरूपमिति विरोधः, न हि भवति यथा—यदेव पीयूषयूषद्राक्षेक्षुरसविशालरसालादिमधुरं तदेव वस्तु कटु, यदेव निंबकलंबकुटजादि कटुकं तदेव मधुरं । यदेव चम्पकाशोकपुन्नागनागलवङ्गप्रियङ्गुहिन्तालतालतमालरसालप्रियालबकुलचक्रवालप्रवालातिपाटलपाटलपटलकुन्दमुचकुन्दकदम्बकमरुवकदमनकवासन्तीशतपत्रनवमालिका मल्लिका कुसुमादि सुगन्धबन्धुरं तदेव दुर्गन्धं । नहि यत्रातपस्तत्र छाया, यत्रच्छाया तत्रातपः । न हि यत्रान्धकारनिकुरम्बप्रलम्बता, तत्रालोक आलोक्यते लोकैः । नहि यत्र वनमध्ये केशरी प्रसरीसरीति स्वरीतिविहारी, तत्र गन्धसिन्धुरो मदोद्धुरतां दधते । यदि वह्निरुष्णोऽस्ति तदा तस्य शीतत्वं नास्ति । जलं यदि शीतलं तदोष्णं न भवति । वह्नेर्द्रव्यकरणे शीतत्वोपलम्भः औपाधिकः कादाचित्कत्वादप्रमाणः । जलस्य वह्नियोगादुष्णत्वमौपाधिकमप्रमाणं । नहि यदेव मेरुमहीधरादिकं महत्प्रमाणं तदेव लघुप्रमाणं भवति परमाण्वादिवत् । नहि यदेव हस्त्यादिकं महत्कायं तदेव कुन्थुपिपीलिकादिवदल्पकायं दृश्यते इति विरोधः प्रत्यक्षलक्ष्य एव विचक्षणानां । तत्र दुर्द्धरविरोधव्याधिविध्वंसनायायतधिया महावैद्येनेवानवद्यसाङ्गोपाङ्गस्याद्वादरसाङ्गासङ्ग वशेन प्रतिक्रियते । अनयोर्विरुद्धधर्मयोः को नाम विरोधः ? किं सहानवस्थानलक्षणोऽथवा परस्परपरिहारस्थितिलक्षणोवध्यघातकस्वभावो वा ? तत्र विरोधत्रयमध्ये न तावत्सहानवस्थानलक्षणः, मृद्द्रव्यलक्षणे पदार्थे स्थासकोशकुशूलघटरूपे

मृद्द्रव्यरूपतयाऽभेदस्याघटादिपर्यायरूपतया भेदस्य प्रत्यक्षबुद्धौ सर्वेषां प्रतिभासमानत्वात्, न च तथा प्रतीयमानयोरेकत्र विरोधः एकत्र परिपक्काम्रफले रूपरसयोरपि विरोधप्रसङ्गात् । परस्परपरिहारलक्षणो विरोधो घटपटादौ भेदाभेदयोः सत्वासत्वयोर्वा सदसतोरेव द्वयोः संभवति, नासतोः खरविषाणस्येव नाप्येकः सन् एकश्चासन् इति सदसतोः संभवति । तथाहि एकान्तवादिमतेऽपि एकस्मिन् वस्तुनि असतोर्भेदाभेदयोः सदसतोर्वा परस्परपरिहारलक्षणाविरोधो न संभवति किन्तु सतोरेव भेदयोः । इति एकस्मिन् पदार्थे भेदाभेदौ एकान्तवादिनापि स्वीक्रियेते, परं परस्परपरिहारेण परस्परपरिहारदोषोऽपि न । यतः समकालमेव यथा तथाविधपरिपक्वसहकारफले रूपरसयोः प्रतीतिः, तथा एकस्मिन् घटादौ वस्तुनि स्थासकोशकुशूलादिभ्यो मृद्द्रव्यरूपतयाऽभेदः, घटादिपर्यायरूपतया तु भेदस्याध्यक्षेण प्रतीयमानत्वात्, प्रतीयमानयोश्च विरोधो न संभवत्येव, दृष्टान्तो रूपरसावेवेति । अपि च दुर्द्धरविरोधसिन्धुरभीताः परिहर्त्तुमशक्यत्वेनैकान्तवादिनः केऽपि केवलभेदमेव, केचिदभेदमेव, केचिन्नित्यत्वं, केऽपि सत्वं, केचनासत्वं, वस्तुतत्वं प्ररूपयन्ति वराकाः । तथाविधशक्त्यभावात् निजोदरदरीपूरणाय गृहे गृहे जनानामग्रे भुजङ्गमं स्फुटस्फटाटोपारोपकोपदं नर्त्तयन्ति केऽपि करण्डिकाडम्बरधारिणः, केऽपि नकुलं स्वकुलकलङ्ककारिणः, केऽप्युत्कटं मर्कटं, केऽपि वृषभं वृषभञ्जनधियः, केऽपि सर्वमानवोत्कटा बोत्कटं, केऽपि कुर्कुटं, स्वकुटुम्बपोषाय । केऽपि दुर्दैववशात् स्वोदरपूरणाय दर्दुरं मर्दयन्ति नर्त्तनावर्त्तनादिभिः । केऽपि किंशुकनासिकं शुकं केऽपि केकिनं निजाङ्के च, केऽपि हरिणं, केऽपि करिणं, केऽपि केसरिणमपि शरणमागतं नर्त्तयन्ति । सर्ववादिशिरोमणेः स्याद्वादवादिनो महात्म्यवर्णनं कर्त्तुं केन शक्यते ? यतो येन स्याद्वादमहामन्त्रेण मन्त्रिताः सर्वेषां घटपटमुकुटादिभावानां भेदाभेदनित्यानित्यसत्वासत्वादिविरुद्धधर्मा एकस्मिन्

प्रत्यसबुद्धौ नीयन्ते । यथा केनापि सर्वमान्त्रिकशिरोमणिना मणिनानाकान्तिकान्तसरीसृपशीर्षोपरि भेकः केकिवन्नृत्यकृत्यं कार्यते निजाद्भुतशक्त्या । यत उक्तं—

"सालूरी कन्हभुअंगमस्स जं देइ मथ्थए पावं(यं)। तं मन्ने कस्सविमंतवाइणो फुरइ माहप्पं ॥१॥"

वध्यघातकस्वभावो विरोधोऽपि अहिनकुलयोरिव बलवदबलवतोर्भवति । न च भेदाभेदयोः सत्वासत्वयोर्बलवदबलवद्भावो दृश्यते । नहि यन्नकुलेन बलवता सर्पस्य विघातः क्रियते, मार्जारेण बलवता मूषकस्य, श्वानेन बलवता मृगस्य, मयूरेण बलवता सर्पस्य, सिंहेन बलवता गन्धसिन्धुरस्य, तथा भेदेनाभेदस्याभेदेन भेदस्य, सत्वेनासत्वस्यासत्वेन सत्वस्य विघातः क्रियमाणः प्रामाणिकैर्जनैः प्रतीयते; भवतु वा कश्चिद्विरोधः, तथाप्यसौ सर्वथा कथञ्चिद्वा स्यात्, प्रकारान्तराभावात्, न तावद्विकल्पः प्रथमः कल्पनार्हः, शीतोष्णस्पर्शयोरपि प्रमेयत्वादिगुणेन विरोधासिद्धेः । न च वाच्यं शीतोष्णस्पर्शयोरेकाधारत्वं नास्तीति, एकस्मिन्नपि हि धूपदहनादिभाजने कचित्प्रदेशे शीतस्पर्शः कचिच्चोष्णस्पर्शः प्रतीयत एव । अथानयोः प्रदेशभेदोऽस्ति । यस्मिन् प्रदेशे शीतस्पर्शः तस्मिन् प्रदेशे उष्णस्पर्शो नास्ति । प्रदेशभेदो भवतु मा भवतु, धूमदहनाद्यवयविनस्तु अभेद एव । नत्वस्य शीतोष्णस्पर्शाधारता नास्ति, इति वक्तुं युक्तं, प्रत्यक्षविरोधात् । तस्मान्न सर्वथा भावानां विरोधो(वि)द्यते ( विरोध उत्पद्यते ) कथञ्चिद्विरोधस्तु सर्वभावेषु तुल्यो न बाधकः, अनेकान्तवादिभिरप्येवमङ्गीकारात् । एषा युक्तिर्नित्यानित्ययोः सत्वासत्वयोः सामान्यविशेषयोरपि ज्ञेया । ननु " प्रत्येकं यो भवेद्दोषो द्वयोर्भावे कथं न सः " इति वचनात्, प्रत्येकं पृथग् भूतयोर्भेदाभेदयोर्यदि विरोध एकाश्रये संयुक्तयोस्तयोः स विरोधो विशेषत उपलभ्यते । यथा जलानलयोः पृथक्पृथक् स्थितयोर्यदि

विरोधः तदा संयुक्तयोस्तयोः स विरोधः सुतरामुपलभ्यते । यथा जलानलयोः संयोगे अनलस्य नाशः, जलं वा स्वभावं परित्यज्योष्णत्वमङ्गीकरोति विरोधः सुतरामुपलभ्यते, तथात्रापि इति चेन्न,—

"गुडो हि कफहेतुः स्यान्नागरं पित्तकारणम् । द्व्यात्मनि न दोषोऽस्ति गुडनागरभेषजे ॥१॥" इति

यथा केवलो गुडः कफं जनयति, केवलं नागरं पित्तं जनयति । द्वयोर्योगे पित्तकफादि(कः) कोऽपि दोषो न स्यात्, प्रत्युत शरीरपुष्ट्यादिगुण एव । तथात्रापि भेदाभेदयोरेकत्र वस्तुनि संवेशितयोर्नदोषः । दिगम्बरा अपि जैना एव । ते हि स्त्रीमुक्तिकेवलिभुक्ती न मन्यन्ते । इति जैनमतम् ॥

वैशेषिकाणां देवः शिवः । द्रव्यगुणकर्मसामान्यविशेषसमवायाख्याः षट् पदार्थाः । प्रत्यक्षानुमाने द्वे प्रमाणे इति वैशेषिकमतम् ॥

जैमिनीयाः सर्वज्ञं न मन्यन्ते । अपौरुषेयाः वेदाः प्रमाणं । यज्ञकरणंधर्मः । प्रत्यक्ष-अनुमान-आगम-उपमान-अर्थापत्ति-अभावाः षट् प्रमाणानि । इति जैमिनीयमतम् ॥

सप्तमं नास्तिकमतं, तेषां मते नास्ति परलोकगामी जीव इति । पृथ्वीजलानलानिलाकाशादिपञ्चभूतेभ्यः कायाकारपरिणतेभ्यश्चैतन्योत्पत्तिः, यथा मद्याङ्गेभ्यो मदशक्तिः । नास्ति पुण्यपापफलं । इति नास्तिकमतम् । एतेषां षण्णां दर्शनानां मध्ये किंनाम मतं भवतां ? कोदेवः ? को गुरुः ? किं देवस्य स्वरूपं ? कियन्ति तत्वानि ? कीदृशो धर्मः शिवशर्मनिबन्धनं ?

कियन्ति प्रमाणानि ? किं प्रमाणस्य स्वरूपं ? इत्यादि सर्वं स्वरूपं निरूपणीयमभिरूपरूपैः शुभवद्भिर्भवद्भिः । के के प्रमाणग्रन्थाः स्वबुद्धिपथं प्रापिताः, अध्ययनाध्यापनादिभिः ? तन्नामानि यथा—स्याद्वादमञ्जरी—प्रमाणमञ्जरी न्यायसिद्धान्तमञ्जरी—रत्नाकरावतारिका—प्रमेयरत्नकोश—प्रमेयकमलमार्त्तण्ड—सांख्यसप्ततिका—परीक्षामुखपञ्जिका—तर्कपरिभाषा—न्यायसार—न्यायावतार—न्यायकुसुमाञ्जलिन्यायचन्द्रिका—न्यायभूषण—षड्दर्शनसमुच्चयवृत्ति—पूर्वमीमांसा—उत्तरमीमांसा—न्यायमकरन्द—तार्किकरक्षा—मञ्जापुरीय—खण्डनविवरणा—वैरंदराजी—महाविद्याविडम्बन—महाविद्याटीका—तर्कदीपिका—तत्वपदीपिका—उपाधिप्रकरण—स्याद्वादरत्नाकराः । एतेषां ग्रन्थानां मध्ये के के ग्रन्था अधीताः सन्ति ? के के अधीयमाना सन्ति ? किंवा शिष्यादीनां अध्याप्यमानाः सन्ति ? विधीयतां किञ्चिदनुमानमानन्दसंप्रविदानममानमानवानां मानवानामाङ्गिरःसुधियामयं क्षणः, श्रीमतां कार्यतामार्यधियाऽस्मत्कर्णयोः स्वर्णयोग्याभरणभूषां सुवर्णरूपस्वभाषितैः गतदूषणभूषणैः । पिण्डिकाग्रहणाय तर्णका इव कौतकाकर्णनाय कर्णमादाय स्थिताः युष्मदभ्यर्णे सकर्णाः । इतस्ततः किं निवर्ण्यमानमस्ति ? भाग्यलभ्याः सभ्या इभ्या अभ्यभ्यागता युष्मदभ्यासे । नायमवसरो लम्बस्य विलम्बस्य स्वभारत्या भारत्यागधिया । यत उक्तं,—

> " अयमवसरः सरस्ते सलिलैरुपकर्त्तुमर्थिनामनिशम् ।
> इदमपि सुलभमम्भो भवति पुरा जलधराभ्युदये ॥ १ ॥ "

अथ पञ्चावयवं अनुमानं मारभ्यते । यथा ? ननु भोः सकलकोविदकुलाचूला, निजवचोवात्यात्राक्षिप्तपरवादिवादवञ्चना- 

र्कतुलाः, स्वबुद्धिवेडाबलावगाहनपूर्वप्राप्तचतुर्दशहृद्यविद्यामहानदीकूलाः, अनन्यजनसामान्यसौजन्याद्यनणुगुणगणसर्वजनानुकूलाः, मया विधीयमानमनुमानं सावधानीभूय समाकर्ण्यतां सकर्णाः । यथा शीतो वह्निर्दाहकत्वात्, यद्यद् दाहकं तत्तत् शीतं यथा हिमं, दाहकश्च वह्निस्तस्मात् शीत एव इति पञ्चावयवमनुमानं ॥

अत्र कण्टकोद्धारप्रकारः । नत्वयं हेतुरसिद्धतावन्ध्यकीसम्बधनिबन्धनलब्धापवादः पक्षधर्मतालक्षणसल्लक्षणपक्षलक्ष्मीकसीकरणात् यो हेतुः पक्षे न वर्त्तते सोऽसिद्ध इति वचनात् । नाप्ययं हेतुः फलितक्षेत्राभोगवत् विरुद्धत्वं धत्ते, विपक्षापक्षपातसपक्षकुक्षिप्रवेशप्रगुणगुणयुगलगोफणगुणोल्लालितयुक्तिकल्लोलगोलकदुराकलनीयत्वात् । यो हेतुः पक्षे स्वाश्रये सपक्षे स्वाश्रयसदृशपदार्थे न वर्त्तते विपक्षे वर्त्तते स विरुद्ध इति वचनात् । न च व्यभिचारनिशाचरसञ्चारदुःसञ्चरोऽयं हेतुः, विपक्षाद्व्यावृत्तिशिखाबन्धबन्धुरत्वात् । यो हेतुः पक्षत्रये वर्त्तते सोऽनेकान्तिकः । नाप्यसौ हेतुः कालात्ययापदिष्टतादुष्टतादृग्भुजङ्गीदष्टः प्रत्यक्षाद्यविरुद्धसाध्यधर्मतागारुडमणिप्रणीतोपचारत्वात् । नापि प्रकरणसमताभयकिंवदन्तीकान्दिशीकोऽयं हेतुः, प्रशमिताशेषप्रत्यनुमानप्रत्यनीकत्वात् । तस्मादस्माकमस्माच्चिन्तामणेरिव निर्दूषणात्साधनात्संपनीपद्यते समीहिता साध्यसिद्धिः । इति हेतुदूषणोद्धारप्रकारः ॥ इति पूर्वपक्षो वादिना कृतः ।

अथोत्तरपक्षे प्रतिवादी वदति,—ननु प्रामाणिकप्राणिश्रेणिवेणीमल्लीवल्लीप्रसूनानूननूतनपूतमुकुटायमानाः, कूटायमाना नामाप्रगुणगुणगणानां, महेश्वाविशारदानां, शारदादत्तप्रसादाः, निरवद्यहृद्यविद्याप्रसादाः, यत्तावद्भवद्भिः शुभवद्भिः वह्नेः शीतत्वसाधनाय दाहकत्वादित्ययं हेतुरुपन्यस्त आस्ते स कालात्ययापदिष्टदोषनिःशूकदन्दशूकदष्टत्वादिष्टसाध्यसाधनाय कथं

सामर्थ्यं धत्ते ? यतो यत्र साध्यं प्रत्यक्षादिप्रमाणबाधितं भवति, स हेतुः कालात्ययापदिष्टः । अत्र साध्यवह्नेः शीतत्वं प्रत्यक्षबाधितं सर्वैराबालगोपालं वह्नावुष्णत्वोपलम्भात् । ननु बहूनामुपलम्भो भवतः प्रमाणरूपोऽप्रमाणरूपो वा ? प्रथमपक्षे बहुभिर्वियोगिभिस्तुषाररसारगन्धसारपीयूषमयूखपीयूषयूषादिशीतलपदार्थेष्वत्यन्तमुष्णत्वमुपलभ्यते, तत्प्रमाणतायां प्रत्यक्षबाधः । अप्रमाणरूपश्चेत् तदा मयोच्यमानं वह्नेः शीतत्वमङ्गीकर्त्तव्यं । किं वह्नेरुष्णत्वं स्फोटकोत्पत्तिनिमित्तत्वं दाहकत्वनिमित्तत्वं वा ? इति विकल्पद्वयं भीमार्जुनद्वयमिव प्रतिपक्षविक्षोभदक्षमवतिष्ठते । यदि प्रथमपक्षः कक्षीक्रियते, तदा करीरकिशलयवरुणवृक्षादिपत्रपिण्डराजिकासालिकादिभ्यः स्फोटक उत्पद्यते, डम्भः पतति, तदा तेषामुष्णत्वमङ्गीकार्यं, नो चेद्वह्नेरप्युष्णत्वं मा भवतु । द्वितीयपक्षोऽप्यक्षमत्वमश्नुते, हिमस्तोमस्य दाहकत्वसद्भावेऽपि उष्णत्वानङ्गीकारात् ।

ननु वह्नेर्दिव्यकरणे यत् शीतत्वं प्रादुर्भवति, तत्पुरा सद्रूपं असद्रूपं वा? प्रथमपक्षे सिद्धसाध्यता, अस्माभिरपि वह्नौ सद्रूपशीतत्वाङ्गीकारात् । द्वितीयपक्षे असतः प्रादुर्भाव एव । कथं ? तुरगङ्गमोत्तमाङ्गश्रृङ्गस्यापि प्रादुर्भावप्रसङ्गात् । असतश्चेत् प्रादुर्भावो भवति, तदा यथा तिलकेभ्यस्तैलं प्रादुर्भवति तथा सिकताकणेभ्यस्तैलं प्रादुर्भूतं विलोक्यते । वन्ध्यागर्भे स्तनन्धयस्य, हिमकरकरनिकरशीतलस्य मध्ये धनञ्जयस्योत्पत्तिः, वनितागर्भे बिलेशयस्य, शिलाग्रे कुशेशयस्योत्पत्तिः प्रसज्यते ।

ननु तप्तायोमयगोलकग्रहणकुशीचाटनादि दिव्यं कुर्वतां वह्नौ शीतत्वं मन्त्रप्रभाववशात् जातं कदाचित्कत्वादप्रमाणं पयानलवशाज्जलस्योष्णत्वं । ननु दिव्यकरणावसरे उत्पद्यमानं शीतत्वं मन्त्रस्य गुणो मन्त्राधिष्ठातृदेवस्य गुणो वह्नेर्गुणो वा ? इति विकल्पत्रयी त्रिनेत्रनेत्रत्रयी तन्त्रीकते, प्रथमविकल्पद्वये तयोर्मन्त्रमन्त्राधिष्ठात्रोः शीतत्वगुणः, वह्नेः किं ? बटुकस्य मातुश्चेत्

पञ्चकर्षास्तर्हि बटुकस्य किं ? अन्यजनानां चक्षुषी तदान्धस्य किं ? धनवतो गृहे धनं तदा दरिद्रस्य किं ? यदि सारसहकार-तरोः शिखरोपरि पक्वाम्रफलानि तदा कुब्जस्य किं ? यदा विद्यावतो विद्या आयान्ति तदा मूर्खस्य किं ? यदि तृतीयो विकल्पः वह्नेर्जन्यमानं शीतत्वं वह्नेरेव गुणः, यथा कुम्भकारेण जन्यमानं रक्तत्वं कुंभस्य गुणः, तदा तत् शीतत्वं वह्नेर्भिन्नमभिन्नं वा ? यदि भिन्नं तदा वह्नेः किं ? अन्यस्योत्पादितं चक्षुरन्यस्यान्धत्वमागतमिति न्यायात् । यदि भिन्नं तदा तदनन्तरं तत् शीतत्वं सर्वकालं विलोक्यत एव वह्नेः, नचैवं तस्मान्मन्त्रशक्तिजनितं शीतत्वमिति निरर्थकं, किन्तु स्वाभाविकमेव वह्नेः शीतत्वं । ननु वह्नेरुष्णत्वं कस्मात् कारणात् ? दाहकत्वादिति चेत्, दाहकत्वमत्र कीदृशं विवक्षितं ? दह भस्मीकरणे इति वचनात्, दाहकत्वं, दाहकत्वमात्रं वा दाहकत्वमिति विकल्पद्वयं, कल्पान्तकालक्षुभिताम्भोधिवत् उत्तारं भवतां परोऽवतरति । यदि प्रथमपक्षः कक्षीक्रियते, तदा तार्णस्य पार्णस्य वा ज्वलनस्योष्णत्वं नान्यस्य भस्मीभवनस्य तत्रैव दर्शनात् । भस्मरूपं तार्णे पार्णे वाऽनले दृश्यते, नान्यत्र, काष्ठानीलवृक्षादेरङ्गाररूपत्वेन दर्शनात् । अथ द्वितीयो विकल्पः दाहकत्वमात्रमिति, तदा हिमस्यापि उष्णत्वं विलोक्यते नचैवमस्ति, तस्माद्दाहकत्वाद्वह्निः शीत एवेति सिद्धिः । इति वह्निशीतत्वव्यवस्थापनस्थलम् ॥

अथ स्वोत्कर्षपरगर्हणास्वरूपनिरूपणोदाहरणानि । यथा मदीया भारती भारतीर्जनयन्ती, नयन्ती विदुरनरनिकरम-मन्दामोदसम्पदं, मसरीसरीति व्याकरणे नव्याकरणे शब्दानुशासनस्य । मदीया सरस्वती प्रतीतानेकयुक्तिलसल्लोलकल्लोल-करालमालामालम्बयन्ती, लम्बयन्ती निजप्रवाहबाहुं, बहिरुल्लालयन्ती परवादिवदनारविन्दाविर्भूतास्मदीतिष्ठवाक्यावाक्यनिकरं, निरत्ययसाहित्यापारपारावारामासादयन्ती, परेषां दुरवगाहतामवगाहते । मद्वाणीवापी वापीनपरिज्ञानकतकक्षोदक्षेपवशान्निर्मल-

तामलतात्पर्यवारिवत् स्वच्छन्दच्छन्दःशास्त्रान्तः स्वं मुखमालोकयन्ती, मदीया शेमुषी मुमुखीवाशेषविशेषवेदिनामानन्दसंपदं संपादयन्ती, मदीया भाषा षड्भाषानुयायिनी, बहुशः कुवादिवदनसदनाविर्भूतयुक्तिपङ्क्तिशर्कराकर्करान्तःकृतपदन्यासा सती कर्कशा तर्कशास्त्रग्रावोत्तुङ्गशृङ्गाग्रभागसञ्चारिणी क्वापि न श्राम्यति। एवंविधेन मया सह स्वकपोलकल्पितानल्पविकल्पजल्पतल्पवानरं वानरमनुकरोषि, तदा त्वया सुप्तः केशरी दरीमध्यमध्यासितो जागरितः, तदा त्वं स्फुटस्फुटाटोपभयङ्करं भुजङ्गमं कोपयामासिवान्, तदा त्वमन्तकरणाय कुपितो निरायुधः प्रगुणीभूतोऽसि, तदा त्वं शितेन कुन्तेन नेत्रकोटरकुटीरकोटौ कण्डूपीडापनोदाय यतसे, तदा त्वं भूयः समीराभिमुखीभूय ज्वालाकलापाकुलं ज्वलनं निजाङ्गज्वालनाय प्रज्वालितवान्। किञ्च यदि निजव्यक्तयुक्तिपङ्क्तिमञ्जरीपिञ्जरीकृताननपङ्कजात्प्रतिजनजनकलकण्ठकण्ठपीठलुठत्प्रगुणगुणचक्रवालः, स्वकलाकौशलविमलफलभरप्रीणिताशेषभूपालः स्ववचनरचनातुच्छेतरच्छायाप्रीतिपदप्रापिताप्रमाणप्रामाणिकपथिकमालसुरसालरसालः, तदाहं तव करालकालः, स्फुरन्मदजलाविलविलोलकपोलमूलभ्रमद्भृङ्गाङ्गनासङ्गबन्धुरः, निर्दम्भस्तम्भप्रलम्बनिजकराछोलनप्रभवप्रभूतभयभ्रान्तताकम्पमानानेकलोकनिकरकन्धराविशुद्धधाराधवलपेशलमुशलाकारप्रबलदन्तमुशलधरः, खलखलच्छृङ्खलोच्छृङ्खलप्रेङ्खदुद्दुखलोपमानसञ्चङ्क्रमणक्रमणोद्धुरसिन्धुरः। त्वं चेत्सिन्धुरस्तदाहं कृतिहुङ्कृतिभक्तातिनिगकृतित्रासमानाकुङ्कुमच्छटाछोटप्रबलघोटनपटिष्ठगरिष्ठकेसरसटास्फुटग्रजाग्रभिकुञ्जपुञ्जनिर्गच्छत्तुच्छकान्तिवीचिनिचयादिन्यायमानः, अतुच्छपुच्छोच्छालनगलितारातिमत्तमातङ्गमानः, द्वितिद्रुतिहाहानमहस्वजिह्वाबालप्रवालसुकोमलरक्तोत्पलसमानपञ्चाननपञ्चाननः। त्वं चेत्पञ्चाननस्तदाहमष्टापदः कष्टापदः प्रतिपदं

ददानः, यदि त्वमष्टापदः, तदाहं स्ववचनजलधाराधोरणीप्रीणितामितप्राणिप्रकरः, निखिलाबालवादिचक्रवालमरालमानादत्ता-नूनमौनभरः, सर्वत्रविहितसौस्थ्यप्रसरः, सर्व वसुधाधारधाराधर इति किञ्च,—

"त्वं तरुश्चेदहं हस्ती त्वं हस्ती चेदहं हरिः । त्वं यदा पञ्चवक्त्रोऽसि तदाहं शरभोपमः ॥ १ ॥

त्वं यदा शरभो जीवस्तदाहं च घनाघनः । समस्तजगदाधारकारकः सस्यसंपदः ॥ २ ॥"

## इति श्रीजल्पमञ्जरी समाप्ता

